## पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च । (५८/७३७)

[1]पूर्व अपर प्रथम चरम जघन्य समान मध्य मध्यम वीर इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, तत्पुरुषश्च [2]समासो भवति । पूर्वपुरुषः । अपरपुरुषः । प्रथमपुरुषः । चरमपुरुषः । जघन्यपुरुषः । [3]समानपुरुषः । मध्यपुरुषः । मध्यमपुरुषः । [4]वीरपुरुषः । पूर्वस्यैवायं प्रपञ्चः ॥

## श्रेण्यादयः कृतादिभिः । (५९/७३८)

श्रेण्यादयः सुबन्ताः कृतादिभिः समानाधिकरणैः[5] सह समस्यन्ते, तत्पुरुषश्च समासो भवति ।

[८१] श्रेण्यादिषु च्व्यर्थवचनम् । (म.भा.१.४००)

अश्रेणयः श्रेणयः कृताः श्रेणिकृताः । एककृताः । [6]पूगकृताः । श्रेण्यादयः [7]पठ्यन्ते । कृतादिराकृतिगणः । च्व्यन्तानां तु 'कुगतिप्रादयः' (२.२.१८/७६१) इत्यनेन नित्यसमासः । श्रेणीकृताः ।

श्रेणि । एक । पूग । [8]कुण्ड । राशि । विशिख । निचय । [9]निधान । इन्द्र । देव । मुण्ड । भूत । [10]श्रवण । वदान्य । अध्यापक । [11]अभिरूपक । ब्राह्मण । क्षत्रिय । पटु । पण्डित । कुशल । चपल । निपुण । [12]कृपण । इति श्रेण्यादिः ।

कृत । मित । [13]मत । भूत । उक्त । [14]समाज्ञात । समाम्नात । [15]समाख्यात । [16]सम्भावित । अवधारित । निराकृत । [17]अवकल्पित । उपकृत । उपाकृत[18] । इति कृतादिः ॥

## क्तेन नञ्विशिष्टेनानञ् । (६०/७३९)

[19]नञेव विशेषो यस्य, सर्वमन्यत् प्रकृत्यादिकं तुल्यं, तत् नञ्विशिष्टम्, तेन नञ्विशिष्टेन क्तान्तेन [20]समानाधिकरणेन सह अनञ् क्तान्तं समस्यते, तत्पुरुषश्च समासो भवति[21] । कृतं च तदकृतं च कृताकृतम् । भुक्ताभुक्तम् । पीतापीतम् । [22]उदितानुदितम् । नुडिटौ [23]तद्भक्तत्वान्नैव भेदकौ । [24]अशितानशितेन (६.३.७४/७५८) जीवति । क्लिष्टाक्लिशितेन (७.२.५०/३०४९) [25]वर्तते ।

[८२] कृतापकृतादीनामुपसङ्ख्यानम् । (म.भा.१.४०१)

कृतापकृतम् । भुक्तविभुक्तम् । [26]पीतविपीतम् । गतप्रत्यागतम् । यातानुयातम् । क्रयाक्रयिका । पुटापुटिका । फलाफलिका । मानोन्मानिका (म.भा.१.४०१) ।

[८३] समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसङ्ख्यानमुत्तरपदलोपश्च ।

शाकप्रधानः पार्थिवः शाकपार्थिवः । कुतपसौश्रुतः । अजातौल्वलिः ॥

---

1. पूर्वादयः सुबन्ताः फ. 2. समासो–जघन्यपुरुषः नास्ति ड. 3. नास्ति फ. 4. नास्ति फ, धीरपुरुषः इत्यधिकम् ह. 5. सुबन्तैः इत्यधिकम् ह. 6. नास्ति ब. इ. 7. पद्यन्ते ग. 8. मुकुन्दुभ ह, कुड्मल क. ड. 9. निधन इ, निर्धन ह, नास्ति ब, निरय निधन क. 10. श्रमण ड. 11. अरूपक क. 12. कुडम् क, नास्ति फ. 13. हित ह, मित क. 14. समज्ञात ह. 15. संख्यात फ. 16. संसेवित क, नास्ति ब. इ. 17. उपकल्पित इ, नास्ति ह. 18. उदाहृत, उदित, सृष्ट, कल्पित, दलित, विश्रुत इत्यधिकम् फ. ह. 19. नञेव क. ड. इ. 20. समानाधिकरणेन नास्ति फ. 21. इति इत्यधिकम् क. 22. नास्ति फ. 23. तद्भक्तत्वादभेदकौ ड. 24. आशितानशितेन इ. 25. जीवति क. फ. ह. 26. पीतापीतम् फ.